## तुदादिगणे इतोऽपि विशेषधातवः

अस्मिन् पाठे तुदादिगणीयाः अवशिष्टविशेष–धातवः उपस्थाप्यन्ते | स्मारणार्थं विशेषधातुः नाम तादृशधातुः यस्य अङ्गस्य साधनकार्यं केवलं गणसम्बद्ध–सामान्यसूत्राणि अधिकृत्य न भवति अपि तु विशिष्टसूत्राणि अधिकृत्य भवति |

1. धात्वादेशः

a. पा–आदिधातूनां धात्वादेशः (द्वौ धातू स्तः)

तुदादौ धातुद्वयम्— षद्लृ, शद्लृ |

**पा–घ्रा–ध्मा–स्था–म्ना–दाण्–दृशि–अर्ति–सर्ति–शद–सदां, पिब–जिघ्र–धम–तिष्ठ–मन–यच्छ–पश्य–ऋच्छ–धौ–शीय–सीदाः** (७.३.७८) = पा घ्रा ध्मा इत्यादीनां स्थाने पिब, जिघ्र, धम एते आदेशाः भवन्ति शिति परे | केवलं शिति परे इति धेयम् | अतः पिबति परन्तु पास्यति इति | पाश्च घ्राश्च ध्माश्च ... सद् च तेषामितरेतरद्वन्द्वः पा–घ्रा–ध्मा–स्था–म्ना–दाण्–दृशि–अर्ति–सर्ति–शद–सदः, तेषां पा–घ्रा–ध्मा–स्था–स्ना–दाण्–दृशि–अर्ति–सर्ति–शद–सदाम् | पिबश्च जिघ्रश्च धमश्च ... सीदश्च तेषामितरेतरद्वन्द्वः पिब–जिघ्र–धम–तिष्ठ–मन–यच्छ–पश्य–ऋच्छ–धौ–शीय–सीदाः | पा–घ्रा–ध्मा–स्था–म्ना–दाण्–दृशि–अर्ति–सर्ति–शद–सदाम् षष्ठ्यन्तं, पिब–जिघ्र–धम–तिष्ठ–मन–यच्छ–पश्य–ऋच्छ–धौ–शीय–सीदाः प्रथमान्तं, द्विपदमिदं सूत्रम् | **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहित–सूत्रमेवम्— **पा–घ्रा–ध्मा–स्था–म्ना–दाण्–दृशि–अर्ति–सर्ति–शद–सदां अङ्गस्य पिब–जिघ्र–धम–तिष्ठ–मन–यच्छ–पश्य–ऋच्छ–धौ–शीय–सीदाः शिति** |

षद्लृ + श → सद् + अ → **पा–घ्रा–ध्मा** (७.३.७८) इत्येनेन सीद–आदेशः → सीद + अ → **अतो गुणे** (६.१.९७) इत्यनेन अपदान्तात् अतः गुणे पूर्वपरयोः पररूपम् एकादेशः → सीद इति अङ्गम् → सीद + ति → सीदति

षद्लृ विसरणगत्यवसादनेषु इति धातुः भ्वादौ अपि तुदादौ अपि भवति | भेदः अस्ति **आच्छीनद्योर्नुम्** (७.१.८०) इत्यनेन तुदादौ शतरि स्त्रीयां नुम्–विकल्पः | पुंसि सीदन्, स्त्रियां सीदन्ती/सीदती |

शद्लृ + श → शद् + अ → **पा–घ्रा–ध्मा** (७.३.७८) इत्यनेन शीय–आदेशः → शीय + अ → **अतो गुणे** (६.१.९७) → शीय इति अङ्गम् → शीय + ते → शीयते

शद्लृ शातने इति धातुः भ्वादौ अपि तुदादौ अपि भवति | उभयत्र रूपाणि समानानि |

**अतो गुणे** (६.१.९७) = अपदान्तात् अतः गुणे पूर्वपरयोः पररूपम् एकादेशः संहितायाम् | गुणः इत्युक्तौ अ, ए, ओ | अतः पञ्चम्यन्तं, गुणे सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **उस्यपदान्तात्** (६.१.९६) इत्यस्मात् **अपदान्तात्** अपि च **एङि पररूपम्**

(६.१.९४) इत्यस्मात् **पररूपम्** इत्यनयोः अनुवृत्तिः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति–सहितं सूत्रम्— **गुणे अपदान्तात् अतः पूर्वपरयोः एकः पररूपं संहितायाम्** |

इदं सूत्रं **वृद्धिरेचि** (६.१.८८), **अकः सवर्णे दीर्घः** (६.१.१०१) इत्यनयोः अपवादभूतसूत्रम् |

यथा—

| | |
|---|---|
| पठ + अन्ति → पठन्ति | **अतो गुणे** (६.१.९७), अत्र **अकः सवर्णे दीर्घः** इत्यस्य अपवादभूतसूत्रम् |
| सेव + ए → सेवे | **अतो गुणे** (६.१.९७), अत्र **वृद्धिरेचि** इत्यस्य अपवादभूतसूत्रम् |

b. इष्–धातोः छकारादेशः (एकः धातुः)

तुदादौ इष इच्छायाम् इति धातुः |

**इषुगमियमां छः** (७.३.७७) = इष्, गम्, यम् एषां छकारादेशः भवति शिति परे | **अलोन्त्यस्य** (१.१.५२) इत्यनेन छ्–आदेशः अन्तिमवर्णस्य स्थाने न तु पूर्णधातोः स्थाने | इषुश्च गमिश्च यम् च तेषामितरेतरद्वन्द्वः इषुगमियमः, तेषाम् इषुगमियमाम् | इषुगमियमां षष्ठ्यन्तं, छः प्रथमान्तं, द्विपदमिदं सूत्रम् | **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **इषुगमियमाम् अङ्गस्य छः शिति** |

केवलं शिति परे इति धेयम् | अतः इच्छति परन्तु एषिष्यति |

इष् + श → **इषुगमियमां छः**, **अलोन्त्यस्य** इत्याभ्यं ष्–स्थाने छ् → इछ् + अ → **छे च** (६.१.७३) इत्यनेन छकारे परे संहितायां विषये ह्रस्वस्य स्वरस्य तुक्–आगमो भवति | **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन इकारस्य अनन्तरं (न तु पूर्वम्) | इछ् + अ → इत्छ् + अ → **स्तोः श्चुना श्चुः** (८.४.४०) इत्यनेन तवर्गस्य शकारचवर्गाभ्यां योगे तवर्गस्य क्रमात् चवर्ग आदेशः → इत्छ् + अ → इच्छ् + अ → इच्छ इति अङ्गम् → इच्छ + ति → इच्छति

| | |
|---|---|
| इष → इष् | **उपदेशेऽजनुनासिक इत्** |
| इष् + अ → इछ् + अ | **इषुगमियमां छः** (७.३.७७) |
| इछ् → इत्छ् | **छे च** (६.१.७३), **आद्यन्तौ टकितौ** (१.१.४६) |
| इत्छ् → इच्छ् | **स्तोः श्चुना श्चुः** (८.४.४०) |
| इच्छ् + अ → इच्छ | वर्णमेलने |
| इच्छ + ति → इच्छति | |

**छे च** (६.१.७२) = छकारे परे ह्रस्वस्वरस्य तुक्–आगमो भवति | तुक् कित् अस्ति अतः **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन यस्य आगमः अस्ति (अत्र 'ह्रस्वस्वरस्य'), तस्य अन्ते आयाति | छे सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **ह्रस्वस्य पिति**

**कृति तुक्** (६.१.७०) इत्यस्मात् **ह्रस्वस्य**, **तुक्** इत्यनयोः अनुवृतिः | **संहितायाम्** (६.१.७१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **ह्रस्वस्य तुक् छे च संहितायाम्** |

अत्र इछ् इति स्थितिः | इछ् इत्यस्मिन् 'इ' ह्रस्वस्वरः, अपि च छकारः परोऽस्ति | अतः तुक्-आगमः भवति— किन्तु कुत्र ? प्रथमप्रश्नः अस्ति यत् अयं तुगागमः कस्य आगमः ? ह्रस्वस्वरस्य इति सूत्रेण उक्तम् | तदा इकारात् प्राक् अथवा परमिति जिज्ञासायां सत्याम्, अग्रिमसूत्रेण समाधानम् |

**आद्यन्तौ टकितौ** (१.१.४६) = टित् च कित् च यस्य आगमः, तस्य क्रमशः आदौ च अन्ते च अवयवः भवति | आगमः टित् चेत् पूर्वम् आयाति; आगमः कित् चेत् अन्ते आयाति | आदिश्च अन्तश्च आद्यन्तौ इतरेतरद्वन्द्वः, टश्च कश्च टकौ, इतरेतरद्वन्द्वः, टकौ इतौ ययोः तौ टकितौ, बहुव्रीहिः | आद्यन्तौ प्रथमान्तं, टकितौ प्रथमान्तं, द्विपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **आद्यन्तौ टकितौ** |

तुक् कित् अस्ति अतः अनेन सूत्रेण 'इछ्' इत्यस्मिन् इकारात् परमायाति | तुक्-आगमे ककारः उकारः च इत्-सञ्ज्ञकौ वर्णौ; तकारः एव अवशिष्यते | अतः इछ् → इत्छ् |

2. <u>सम्प्रसारणिनः धातवः</u> (4 धातवः)

तुदादिगणे चत्वारः सम्प्रसारणिनः धातवः—

ओव्रस्चू छेदने (कर्तयति) → व्रश्च्
प्रच्छ ज्ञीप्सायाम् → प्रच्छ्
भ्रस्ज् पाके (to fry, parch, roast) → भ्रस्ज्
व्यच व्याजीकरणे (वञ्चयति) → व्यच्

**ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (६.१.१६) = ग्रह्, ज्या, वय्, व्यध्, वश्, व्यच्, व्रश्च्, प्रच्छ्, भ्रस्ज्, एषां सम्प्रसारणं भवति किति ङिति प्रत्यये परे | इतरेतरद्वन्द्वः, षष्ठीविभक्तौ | ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां षष्ठ्यन्तम्, ङिति सप्तम्यन्तम्, च अव्ययम्, त्रिपदमिदं सूत्रम् | **वचिस्वपियजादीनां किति** (६.१.१५) इत्यस्मात् **किति** इत्यस्य अनुवृत्तिः; **ष्यङः सम्प्रसारणम् पुत्रपत्योस्तत्पुरुषे** (६.१.१३) इत्यस्मात् **सम्प्रसारणम्** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहित-सूत्रम्— **ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति किति च सम्प्रसारणम्** |

व्रश्च् → व्रश्च् + श → व्रश्च् + अ → **ग्रहि ज्या** इत्यनेन सम्प्रसारणम् → वृश्च् + अ → वृश्च इति अङ्गम् → वृश्च + ति → वृश्चति
प्रच्छ् → प्रच्छ् + श → **ग्रहि ज्या** इत्यनेन सम्प्रसारणम् → पृच्छ् + अ → पृच्छ इति अङ्गम् → पृच्छ + ति → पृच्छति
भ्रस्ज् → भ्रस्ज् + श → भ्रस्ज् + अ → **ग्रहि ज्या** इत्यनेन सम्प्रसारणम् → भृस्ज् + अ → **स्तोः श्चुना श्चुः** → भृश्ज् + अ

→ **झलां जश् झशि** → भृज्ज् + अ → भृज्ज इति अङ्गम् → भृज्ज + ति/ते → भृज्जति, भृज्जते

व्यच् → व्यच् + श → व्यच् + अ → **ग्रहि ज्या** इत्यनेन सम्प्रसारणम् → विच् + अ → विच इति अङ्गम् → विच + ति → विचति

क्त प्रत्यये परे (किति इत्यस्य उदाहरणम्)—
व्रश्च् → वृक्णः
प्रच्छ् → पृष्टः
भ्रस्ज् → भृष्टः
व्यच् → विचितः

**इग्यणः सम्प्रसारणम्** (१.१.४५) = यणः स्थाने यः इक्-प्रत्याहारे स्थितवर्णः आदिष्टः, तस्य सम्प्रसारण-संज्ञा भवति | इक् प्रथमान्तं, यणः षष्ठ्यन्तं, सम्प्रसारणम् प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं सम्पूर्णम्— **यणः इक् सम्प्रसारणम्** |

**सम्प्रसारणाच्च** (६.१.१०८) = सम्प्रसारण-संज्ञक-वर्णात् परम् अच् अस्ति चेत्, पूर्वपरयोः स्थाने एकः पूर्वरूपादेशो भवति | सम्प्रसारणात् पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **इको यणचि** (६.१.७७) इत्यस्मात् **अचि**, **अमि पूर्वः** (६.१.१०७) इत्यस्मात् **पूर्वः** इत्यनयोः अनुवृत्तिः भवतः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति-सहित-सूत्रम्— **सम्प्रसारणात् च अचि पूर्वपरयोः एकः पूर्वः संहितायाम्** |

**न सम्प्रसारणे सम्प्रसारणम्** (६.१.३७) = सम्प्रसारणे परे पूर्वं स्थितस्य सम्प्रसारणं न भवति | न अव्ययपदं, सम्प्रसारणे सप्तम्यन्तं, सम्प्रसारणं प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं सम्पूर्णम्— **न सम्प्रसारणे सम्प्रसारणम्** |

3. <u>नुमागमः</u> (8 धातवः)

एतावता अस्माभिः दृष्टं यत् धातुः इदित् चेत्, नुमागमस्य प्रसक्तिः | यथा वदि-धातुः इदित् (ह्रस्व-इकारः इत् यस्य सः) अस्ति अतः **इदितो नुम् धातोः** (७.१.५८) इति सूत्रेण नुमागमः विहितः | वदि → वद् → वन्द् → वंद् → वन्द् इति भवति | परन्तु तुदादिगणे कश्चन अन्तर्गणः अस्ति (मुचाद्यन्तर्गणः) यत्र धातुः इदित् नास्ति चेदपि नुमागमः विधीयते |

<u>मुचाद्यन्तर्गणः</u>

अस्मिन् अन्तर्गणे अष्टौ धातवः सन्ति— मुच्, सिच्, विद्, खिद्, पिश्, कृत्, लिप्, लुप्

मुच्लृ मोक्षणे (मुक्तीकरणे) → मुच्
षिच क्षरणे (सिञ्चने) → सिच्
विद्लृ लाभे (प्राप्तौ)→ विद्
खिद परिघाते (खिन्नः भवति, दुःखम् अनुभवति) → खिद्
पिश अवयवे (भागविभागीकरणे) → पिश्

कृती छेदने (कर्तयति) → कृत्
लिप उपदेहे (लेपने) → लिप्
लुप्लृ छेदने (कर्तयति) → लुप्

मुच् + श → मुच् + अ →

**शे मुचादीनाम्** (७.१.५९) = मुचादीनां नुमागमः भवति शे परे | मुच् आदिर्येषां ते मुचादयः, तेषां मुचादीनाम् | शे सप्तम्यन्तं, मुचादीनां षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **इदितो नुम् धातोः** (७.१.५८) इत्यस्मात् **नुम्** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **मुचादीनाम् अङ्गस्य नुम् शे** |

**मिदचोऽन्त्यात्परः** (१.१.४७) = यः मित् अस्ति, सः अच्-वर्णेषु अन्त्यात् परः आयाति, अपि च अयं मित् यस्य वर्ण-समुदायस्य, तस्य अन्तिमावयवो भवति | म् इत् यस्य सः मित्, बहुव्रीहिः | मित् प्रथमान्तम्, अचः षष्ठ्यन्तम्, अन्त्यात् पञ्चम्यन्तम्, परः प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **आद्यन्तौ टकितौ** (१.१.४६) इत्यस्मात् **अन्तः** इत्यस्य अनुवृत्तिः | अस्मिन् सूत्रे 'अचः' षष्ठीविभक्तौ; "अचः अन्त्यात्" इत्यस्य अर्थः निर्धारणम्— नाम "सर्वेषु स्वरेषु अन्तिमः, तस्मात्" | अत्र **अचः** एकवचने यतोहि अनेन अच्-जातिः इति इष्टम् | आशयः बहुवचनं, निर्धारण-सप्तमी (बहुषु एकम्) | **जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्** (१.२.५८) = जाति-आख्यायाम् एकस्मिन् बहुवचनम् अन्यतरस्याम् | तर्हि 'अचः' एकवचने चेदपि सार्वत्रिक-बहुवचनार्थकः | इत्थञ्च षष्ठीविभक्तेः अर्थः 'स्थाने' इति न; **षष्ठी स्थानेयोगा** (१.१.४९) इति सामान्यम्, इदं सूत्रं विशेषः | अनुवृत्ति-सहितसूत्रम्— **मित् अचः अन्त्यात् परः अन्तः** |

अनेन सूत्रेण नुम् "यस्य वर्ण-समुदायस्य, तस्य अन्तिमावयवो भवति", इत्युक्तम् | अस्य अर्थः कः इति स्पष्टं भवति सुबन्तप्रकरणे | ज्ञान-शब्दः बहुवचने 'ज्ञानानि' भवति | ज्ञान + इ [शि-प्रत्ययः, **लशक्वतद्धिते** (१.३.८) इत्यनेन 'इ' अवशिष्यते] → **मिदचोऽन्त्यात्परः** (१.१.४७) इत्यनेन नुमागमः → ज्ञान + न् + इ → अयं नकारः ज्ञान इति अङ्गस्य वर्ण-समुदायस्य अन्तिमावयवः इति कारणेन **सर्वनामस्थाने चासम्बुद्धौ** (६.४.८) इत्यनेन अङ्गस्य उपधायाः दीर्घः → ज्ञानान् + इ → ज्ञानानि | यदि नकारः ज्ञान इति अङ्गस्य अन्तिमावयवः नाभविष्यत्, अकारः उपधायां नाभविष्यत्, **सर्वनामस्थाने चासम्बुद्धौ** (६.४.८) इत्यनेन अकारस्य दीर्घादेशः च नाभविष्यत् |

(प्रश्नः— अत्रोक्तं 'ज्ञान + इ [शि-प्रत्ययः]' | सुबन्तविषये प्रत्ययाः भवन्ति सु, औ, जस् इत्यादयः | तर्हि प्रथमपुरुषस्य बहुवचने 'जस्' इति प्रत्ययः भवेत्; कथं वा 'शि' इति जातम् ? मूलप्रत्ययाः सु, औ, जस् इति तु सत्यम् | किन्तु अनन्तरं प्रत्ययादेशाः भवन्ति— मूलप्रत्ययानां स्थाने आदेशाः भवन्ति | सुबन्तविषये लिङ्गम् अनुसृत्य, कुत्रचित् प्रातिपदिकस्य अन्तिमवर्णम् अनुसृत्य च आदेशाः भिद्यन्ते | नपुंसकलिङ्गे **जश्शसोः शिः** (७.१.२०) इत्यनेन नपुंसकात् अङ्गात् जस्-स्थाने शि-आदेशः | अनेन नपुंसकलिङ्गे, प्रथमपुरुषस्य बहुवचने इकारः आयाति—वनानि, वारीणि, मधूनि, जगन्ति, कर्माणि, धनूंषि, मनांसि |)

नुम् आगमः मित् अस्ति (मकारः इत् यस्य सः), अतः नुम् अचः अन्त्यात् परम् आयाति |

उदा—

मुचऌ → मुच्      **उपदेशेऽजनुनासिक इत्**

मुच् → मुन्च्      **शे मुचादीनाम्**

मुन्च् → मुंच्      **नश्चापदान्तस्य झलि**

मुंच् → मुञ्च्      **अनुस्वारस्य ययि परसवर्णः**

मुञ्च् + श → मुञ्च इति अङ्गम्

मुञ्च + ति → मुञ्चति

धेयं यत् श–विकरणप्रत्ययः यत्र न विहितः, तत्र नुमागमो न भवति | मुच् + क्त → मुक्तः |

षिच → सिच् + श → सिन्च् + अ → सिंच् + अ → सिञ्च् + अ → सिञ्च इति अङ्गम् → सिञ्च + ति → सिञ्चति

विद्ऌ → विद् + श → विन्द् + अ → विंद् + अ → विन्द् + अ → विन्द इति अङ्गम् → विन्द + ति → विन्दति

खिद → खिद् + श → खिन्द् + अ → खिंद् + अ → खिन्द् + अ → खिन्द इति अङ्गम् → खिन्द + ति → खिन्दति

पिश → पिश् + श → पिन्श् + अ → पिंश् + अ → पिंश इति अङ्गम् → पिंश + ति → पिंशति

कृती → कृत् + श → कृन्त् + अ → कृंत् + अ → कृन्त् + अ → कृन्त इति अङ्गम् → कृन्त + ति → कृन्तति

लिप → लिप् + श → लिन्प् + अ → लिंप् + अ → लिम्प् + अ → लिप्म इति अङ्गम् → लिम्प + ति → लिम्पति

लुप्ऌ → लुप् + श → लुन्प् + अ → लुंप् + अ → लुम्प् + अ → लुम्प इति अङ्गम् → लुम्प + ति → लुम्पति

अनुस्वारादेशः— **नश्चापदान्तस्य झलि** |

**नश्चापदान्तस्य झलि** (८.३.२४) = अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारादेशो भवति झलि परे | झल्–प्रत्याहारे वर्गस्य प्रथमः, द्वितीयः, तृतीयः, चतुर्थः च वर्णाः अपि च श्, ष्, स्, ह् इति वर्णाः अन्तर्भूताः | पदस्य अन्तः पदान्तः, न पदान्तः अपदान्तः तस्य अपदान्तस्य | नः षष्ठ्यन्तं, च अव्ययपदम्, अपदान्तस्य षष्ठ्यन्तं, झलि सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **मोऽनुस्वारः** (८.३.२३) इत्यस्मात् **मः** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अपदान्तस्य मः नः च अनुस्वारः झलि संहितायाम्** |

परसवर्णादेशः— **अनुस्वारस्य ययि परसवर्णः** |

**अनुस्वारस्य ययि परसवर्णः** (८.४.५८) = अनुस्वारस्य स्थाने परसवर्णादेशो भवति ययि परे | परस्य सवर्णः, परसवर्णः, षष्ठी तत्पुरुषः | अनुस्वारस्य षष्ठ्यन्तं, ययि सप्तम्यन्तं, परसवर्णः प्रथमान्तं, त्रिपदमिदं सूत्रम् | यय्–प्रत्याहारे श्, ष्, स्, ह् एतान् वर्जयित्वा सर्वे हल्–वर्णाः अन्तर्भूताः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् संहितायाम् इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अनुस्वारस्य ययि परसवर्णः संहितायाम्** |

4. <u>सन्धिकार्यम्</u> (2 धातू)

ओलस्जी व्रीडायाम् (लज्जितो भवति) → लस्ज्

टुमस्जो शुद्धौ (निर्मलो भवति, स्वच्छो भवति, स्नानं करोति; जले निमग्नो भवति) → मस्ज्

| | |
|---|---|
| ओलस्जी → लस्ज् | **उपदेशेऽजनुनासिक इत्** |
| लस्ज् → लश्ज् | **स्तोः श्चुना श्चुः** (८.४.४०) |
| लश्ज् → लज्ज् | **झलां जश् झशि** (८.४.५३) |
| लज्ज् + श → लज्ज इति अङ्गम् | |
| लज्ज + ते → लज्जते | |

**झलां जश् झशि** (८.४.५३) = झलां स्थाने जशादेशो भवति झशि परे | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन जश्-वर्णेषु वर्णनिर्धारणम् | झलां षष्ठ्यन्तं, जशः प्रथमान्तम्, झशि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | झश्-प्रत्याहारे वर्गाणां तृतीयचतुर्थाः च वर्णाः अन्तर्भूताः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **झलां जश् झशि संहितायाम्** |

टुमस्जो → मस्ज् → मश्ज् → मज्ज् → मज्ज् + अ → मज्ज इति अङ्गम् → मज्ज + ति → मज्जति

5. <u>आय प्रत्ययः</u> (1 धातुः)

तुदादौ विच्छ गतौ → विच्छ् इति धातुः |

**गुपूधूपविच्छिपणिपनिभ्य आयः** (३.१.२८) = गुपू, धूप, विच्छ, पण, पन, एतेभ्यः धातुभ्यः आय-प्रत्ययो भवति स्वार्थे | गुपूश्च धूपश्च विच्छिश्च पणिश्च पनिश्च तेषामितरेतरद्वन्द्वः गुपूधूपविच्छिपणिपनयः, तेभ्यः गुपूधूपविच्छिपणिपनिभ्यः | गुपूधूपविच्छिपणिपनिभ्यः पञ्चम्यन्तम्, आयः प्रथमान्तं, द्विपदमिदं सूत्रम् | **प्रत्ययः** (३.१.१), **परश्च** (३.१.२) इत्यनयोः अधिकारः; **धातोरनेकाचो हलादेः क्रियासमभिहारे यङ्** (३.१.२२) इत्यस्मात् **धातोः** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **गुपूधूपविच्छपणिपनिभ्यः धातुभ्यः आयः प्रत्ययः परश्च** |

विच्छ् + आय → विच्छाय → **सनाद्यन्ता धातवः** (३.१.३२) इत्यनेन धातु-संज्ञा → विच्छाय इति धातुः → कर्त्रर्थे सार्वधातुके परे **तुदादिभ्यः शः** (३.१.७७) → विच्छाय + अ → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः पररूपम् एकादेशः → विच्छाय इति अङ्गम् → विच्छाय + ति → विच्छायति

अत्र आय-प्रत्ययो भवति स्वार्थे इत्युक्तं स्पष्टीकरणार्थं यथा णिच्-प्रत्ययः चुरादिगणे; इमौ प्रत्ययौ धातोः स्वस्य अर्थपोषणं करोति नान्यत् किमपि | नाम अनयोः प्रत्यययोः संयोजनेन धातोः अर्थः न परिवर्तते | केवलं रूपस्य साधनार्थम् अयं आय-प्रत्ययः उपयुज्यते पाणिनिना; धातुः अस्ति विच्छ्, रूपम् अस्ति विच्छायति— तस्य साधनार्थम् आय-प्रत्ययः अपेक्षितः |

अस्मिन् सूत्रे अवशिष्टाः धातवः भ्वादिगणे; भ्वादिगणस्य पाठे तेषां विवरणम्— गोपायति, धूपायति, पणायति, पनायति |

6. विकरणप्रत्यय–विकल्पः (1 धातुः)

**वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः** (३.१.७०) = भ्राश्, भ्लाश्, भ्रमु चलने, क्रम्, क्लम्, त्रस्, **त्रुट्**, लष्, एतेभ्यः श्यन् विकल्पेन भवति, कर्त्रर्थके प्रत्यये परे | भ्रशश्च भ्लाशश्च भ्रमुश्च क्रमुश्च, क्लमुश्च, त्रसिश्च त्रुटिश्च लष् च तेषां समाहारद्वन्द्वः भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलष्, तस्मात् भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः | वा अव्ययपदं, भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः पञ्चम्यन्तं, द्विपदमिदं सूत्रम् | **दिवादिभ्यः श्यन्** (३.१.६९) इत्यस्मात् **श्यन्** इत्यस्य अनुवृत्तिः, **कर्तरि शप्** (३.१.६८) इत्यस्मात् **कर्तरि** इत्यस्य अनुवृत्तिः, **सार्वधातुके यक्** (३.१.६७) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **प्रत्ययः** (३.१.१), **परश्च** (३.१.२) इत्यनयोः अधिकारः | **धातोरेकाचो हलादेः क्रियासमभिहारे यङ्** (३.१.२२) इत्यस्मात् **धातुभ्यः** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः धातुभ्यः श्यन् प्रत्ययः परश्च वा कर्तरि सार्वधातुके** |

तुदादौ त्रुट् → श–प्रत्यये त्रुटति, विकल्पेन श्यन्–प्रत्यये त्रुट्यति |

अस्मिन् सूत्रे त्रुट्–धातुः तुदादिगणे, अवशिष्टाः सर्वे धातवः भ्वादिगणे सन्ति; न कोऽपि धातुः दिवादिगणे | इत्थं च विशिष्टसूत्रेण श्यन् इति विकरणप्रत्ययः विहितः; श्यन्–अभावे शप् इति सामान्यं भ्वादौ, श इति सामान्यं तुदादौ |

इति तुदादिगणे समग्रं तिङ्–सम्बद्धं सार्वधातुकप्रकरण–चिन्तनं समाप्तम् |

Swarup – May 2013 (updated August 2015)